॥ कृष्ण स्तोत्राणि एवं कवचम् ॥

अनुक्रमाणिका

कृष्ण स्तोत्राणि

1. कृष्ण मंत्र 02
2. सप्तश्लोकी गीता 03
3. कृष्ण द्वादश नाम स्तोत्रम् 04
4. मधुराष्टकम् स्तोत्रम् 05
5. दामोदराष्टकम् स्तोत्रम् 06
6. अच्युतस्याष्टकम् स्तोत्रम् 07
7. कृष्णाष्टकम् स्तोत्रम् - 1 08
8. कृष्णाष्टकम् स्तोत्रम् - 2 09
9. गोविन्दाष्टकम् स्तोत्रम् 10
10. गोविन्द दामोदर स्तोत्रम् 11
11. ज्वर कृत कृष्ण स्तोत्रम् 12
12. देवा कृत गर्भ स्तुति 13
13. चर्पट पंजरिका स्तोत्रम् 14
14. शालिग्राम स्तोत्रम् 16
15. सन्तान गोपाल स्तोत्रम् 19
16. श्री कृष्ण कवचम् 23

अष्टोत्तरशत / सहस्त्रनाम

17. कृष्ण अष्टोत्तरशत नामावली 26
18. कृष्ण सहस्त्र नामावली 27

आरती

19. कृष्ण जी की आरती 37
20. कुंज बिहारी जी की आरती 38
21. भागवत पुराण जी की आरती 39
22.

- **कृष्ण मंत्र** **कृं कृष्णाय नमः ।**
  - **श्रीकृष्ण गोविन्द हरे मुरारे । हे नाथ नारायण वासुदेवाय ॥**

7 अक्षर मंत्र	धन के लिए	**गोवल्लभाय स्वाहा ।**
8 अक्षर मंत्र	हर इच्छा पूरी करता है	**गोकुल नाथाय नमः ।**
10 अक्षर मंत्र	धन-धान्य देने वाला	**क्लीं ग्लौं क्लीं श्यामलांगाय नमः ।**
12 अक्षर मंत्र	प्रेम विवाह हेतु	**ॐ नमो भगवते श्रीगोविन्दाय ।**
17 अक्षर मंत्र	करोड़पति बनाता है	**ॐ श्रीं नमः श्रीकृष्णाय परिपूर्णतमाय स्वाहा ।**
22 अक्षर मंत्र	वाणी का वरदान देता है	**'ऐं क्लीं कृष्णाय ह्रीं गोविंदाय श्रीं गोपीजन वल्लभाय स्वाहा ह्सो ।**
23 अक्षर मंत्र	हर बाधा दूर करता है	**ॐ श्रीं ह्रीं क्लीं श्रीकृष्णाय गोविंदाय गोपीजन वल्लभाय श्रीं श्रीं श्री**
28 अक्षर मंत्र	वांछित फल प्राप्ति हेतु	**'ॐ नमो भगवते नन्दपुत्राय आनन्दवपुषे गोपीजन वल्लभाय स्वाहा**
29 अक्षर मंत्र	स्थिर लक्ष्मी हेतु	**लीलादंड गोपीजनसंसक्तदोर्दण्ड बालरूप मेघश्याम भगवन विष्णो स्वाहा।'**
32 अक्षर मंत्र	समस्त आर्थिक मनोकामनाएं हेतु	**नन्दपुत्राय श्यामलांगाय बालवपुषे कृष्णाय गोविन्दाय गोपीजनवल्लभाय स्वाहा।'**
33 अक्षर मंत्र	विद्या प्राप्ति हेतु	**ॐ कृष्ण कृष्ण महाकृष्ण सर्वज्ञ त्वं प्रसीद मे । रमारमण विद्येश विद्यामाशु प्रयच्छ मे ॥**

॥ सप्तश्लोकी गीता ॥

- ओमित्येकाक्षरं ब्रह्म व्याहरन्मामनुस्मरन् ।
  य: प्रयाति त्यजन्देह स याति परमां गतिम् ॥ ॥ १॥

- स्थाने हृषीकेश तव प्रकीर्त्या जगत्प्रहृष्यत्यनुरज्यते च ।
  रक्षांसि भीतानि दिशो द्रवन्ति सर्वे नमस्यन्ति च सिद्धसंघा: ॥ ॥ २॥

- सर्वत:पाणिपादं तत्सर्वतोऽक्षिशिरोमुखम् ।
  सर्वत:श्रुतिमल्लोके सर्वमावृत्य तिष्ठति ॥ ॥ ३॥

- कविं पुराणमनुशासितारमणोरणीयांसमनुस्मरेद्य: ।
  सर्वस्य धातारमचिन्त्यरूपमादित्यवर्णं तमस: परस्तान् ॥ ॥ ४॥

- ऊर्ध्वमूलमध:शाखमश्वत्थं प्राहुरव्ययम्।
  छन्दांसि यस्य पर्णानि यस्तं वेद स वेदवित् ॥ ॥ ५॥

- सर्वस्य चहं हृदि सन्निविष्टो मत्त: स्मृतिर्ज्ञानमपोहनं च ।
  वेदैश्च सर्वैरहमेव वेद्यो वेदान्तकृद्वेदविदेव चाहम्॥ ॥ ६॥

- मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु ।
  मामेवैष्यसि युक्त्वैवमात्मानं मत्परायण: ॥ ॥ ७॥

॥ इति श्रीमद्भागवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे सप्तश्लोकी गीता सम्पूर्ण ॥

॥ श्री कृष्ण द्वादश नाम स्तोत्रम् ॥

- शृणुध्वं मुनयः सर्वे गोपालस्य महात्मनः ।
  अनन्तस्याप्रमेयस्य नामद्वाशकं स्तवम् ॥
- अर्जुनाय पुरा गीतं गोपालेन महात्मना ।
  द्वारकायां प्रार्थयते यशोदायाश्च सन्निधौ ॥

- **ध्यानम्**

  जानुभ्यामपि धावन्तं बाहुभ्यामतिसुन्दरम् ।
- सकुण्डलाळकं बालं गोपालं चिन्तयेदुषः॥

- **स्तोत्रम्**

  प्रथमं तु हरिं विद्यात् द्वितीयं केशवं तथा ।
  तृतीयं पद्मनाभं तु चतुर्थं वामनं तथा ॥ ॥ १॥
- पञ्चमं वेदगर्भं च षष्ठं तु मधुसूदनं ।
  सप्तमं वासुदेवं च वराहं चाष्टमं तथा ॥ ॥ २॥
- नवमं पुण्डरीकाक्षं दशमं तु जनार्दनम् ।
  कृष्णमेकादशं प्रोक्तं द्वादशं श्रीधरं तथा ॥ ॥ ३॥
- एतद्द्वादशनामानि मया प्रोक्तानि फाल्गुन ।
  कालत्रये पठेद्यस्तु तस्य पुण्यफलं शृणु ॥ ॥ ४॥
- चान्द्रायणसहस्रस्य कन्यादानशतस्य च ।
  अश्वमेधसहस्रस्य फलमाप्नोति मानवः ॥ ॥ ५॥

॥ इति श्रीकृष्ण द्वादश नाम स्तोत्रम् सम्पूर्णम् ॥

॥ मधुराष्टकम् स्तोत्रम् ॥

अधरं मधुरं वदनं मधुरं ,
नयनं मधुरं हसितं मधुरं ।
हृदयं मधुरं गमनं मधुरं ,
मधुराधिपते रखिलं मधुरं ॥१॥

वचनं मधुरं चरितं मधुरं ,
वसनं मधुरं वलितं मधुरं ।
चलितं मधुरं भ्रमितं मधुरं ,
मधुराधिपते रखिलं मधुरं ॥२॥

वेणुर्मधुरो रेणुर्मधुरः ,
पाणिर्मधुरः पादौ मधुरौ ।
नृत्यं मधुरं सख्यं मधुरं ,
मधुराधिपते रखिलं मधुरं ॥३॥

गीतं मधुरं पीतं मधुरं ,
भुक्तं मधुरं सुप्तं मधुरं ।
रूपं मधुरं तिलकं मधुरं ,
मधुराधिपते रखिलं मधुरं ॥४॥

करणं मधुरं तरणं मधुरं ,
हरणं मधुरं स्मरणं मधुरं ।
वमितं मधुरं शमितं ,
मधुराधिपते रखिलं मधुरं ॥५॥

गुञ्जा मधुरा माला ,
यमुना मधुरा वीची मधुरा ।
सलिलं मधुरं कमलं मधुरं ,
मधुराधिपते रखिलं मधुरं ॥६॥

गोपी मधुरा लीला मधुरा ,
युक्तं मधुरं मुक्तं मधुरं ।
दृष्टं मधुरं शिष्टं मधुरं ,
मधुराधिपते रखिलं मधुरं ॥७॥

गोपा मधुरा गावो मधुरा ,
यष्टिर्मधुरा सृष्टिर्मधुरा ।
दलितं मधुरं फलितं ,
मधुराधिपते रखिलं मधुरं ॥८॥

॥ इति श्रीमद् वल्लभाचार्य विरचितं मधुराष्टकं संपूर्णम् ॥

॥ दामोदराष्टकम् स्तोत्रम् ॥

नमामीश्वरं सच्चिदानन्दरूपं,
लसत्कुण्डलं गोकुले भ्राजमानम्।
यशोदाभियोलूखलाधावमानं,
परामृष्टमत्यं ततो द्रुत्य गोप्या ॥ ॥१॥

रुदन्तं मुहुर्नेत्रयुग्मं मृजन्तं,
कराम्भोज-युग्मेन सातंकनेत्रम्।
मुहुःश्वासकम्प - त्रिरेखाप्रकण्ठ-
स्थित ग्रैव-दामोदरं भक्तिबद्धम् ॥ ॥२॥

इतीदृक् स्वलीलाभिरानन्द कुण्डे,
स्वघोषं निमज्जन्तमाख्यापयन्तम्।
तदीयेशितज्ञेषु भक्तैर्जितत्वं,
पुनः प्रेमतस्तं शतावृत्ति वन्दे ॥ ॥३॥

वरं देव मोक्षं न मोक्षावधिं वा,
न चान्यं वृणेऽहं वरेशादपीह।
इदं ते वपुर्नाथ गोपालबालं,
सदा मे मनस्याविरास्तां किमन्यैः ॥४॥

इदन्ते मुखाम्भोजमव्यक्तनीलै
-र्वृतं कुन्तलैः स्निग्ध-रक्तैश्च गोप्या।
मुहुश्चुम्बितं बिम्बरक्ताधरं मे,
मनस्याविरास्तामलं लक्षलाभैः॥ ॥५॥

नमो देव दामोदरानन्त विष्णो
प्रसीद प्रभो दुःखजालाब्धिमग्नम्।
कृपादृष्टि-वृष्ट्यातिदीनं बतानु
गृहाणेश मां मज्ञमेध्यक्षिदृश्यः ॥ ॥६॥

कुबेरात्मजौ बद्धमुरत्यैव यद्वत्,
त्वया मोचितौ भक्तिभाजौ कृतौ च।
तथा प्रेमभक्तिं स्वकां मे प्रयच्छ,
न मोक्षे ग्रहो मेऽस्ति दामोदरेह ॥ ॥७॥

नमस्तेऽस्तु दाम्ने स्फुरद्दीप्तिधाम्ने,
त्वदीयोदरायाथ विश्वस्य धाम्ने।
नमो राधिकायै त्वदीय-प्रियायै,
नमोऽनन्तलीलाय देवाय तुभ्यम् ॥८॥

॥ इति श्रीमद् पद्मपुराणे दामोदराष्टकम् स्तोत्रम् सम्पूर्णम् ॥

॥ अच्युताष्टकम् स्तोत्रम् ॥

अच्युतं केशवं रामनारायणं ,
कृष्ण दामोदरं वासुदेवं हरिम् ।
श्रीधरं माधवं गोपिका वल्लभं ,
जानकी नायकं रामचंद्रं भजे ॥ ॥१॥

अच्युतं केशवं सत्यभा माधवं ,
माधवं श्रीधरं राधिका राधितम् ।
इन्दिरा मन्दिरं चेतसा सुन्दरं ,
देवकी नन्दनं नन्दजं सन्दधे ॥ ॥२॥

विष्णवे जिष्णवे शाङ्खिने चक्रिणे ,
रुक्मिणि रागिणे जानकी जानये ।
बल्लवी वल्लभायार्चिता यात्मने ,
कंस विध्वंसिने वंशिने ते नमः ॥ ॥३॥

कृष्ण गोविन्द हे राम नारायण ,
श्रीपते वासुदेवाजित श्रीनिधे ।
अच्युतानन्त हे माधवाधोक्षज ,
द्वारकानायक द्रौपदीरक्षक ॥ ॥४॥

राक्षस क्षोभितः सीतया शोभितो ,
दण्डकारण्यभू पुण्यताकारणः ।
लक्ष्मणेनान्वितो वानरौः सेवितो-
अगस्त सम्पूजितो राघव पातु माम् ॥५॥

धेनुका रिष्टका निष्टकृद्द्वे षिहा ,
केशिहा कंसहृद् वंशिकावादकः ।
पूतना कोपकःसूरजाखेलनो ,
बाल गोपालकः पातु मां सर्वदा ॥ ॥६॥

विद्युदुद्योतवत् प्रस्फुरद्वाससं ,
प्रावृडम्भोदवत् प्रोल्लसद्विग्रहम् ।
वन्यया मालया शोभितोरःस्थलं ,
लोहिताङ्घ्रिद्वयं वारिजाक्षं भजे ॥ ॥७॥

कुञ्चितैः कुन्तलैर्भ्राजमाननं ,
रत्नमौलिं लसत्कुण्डलं गण्डयोः ।
हारकेयूरकं कङ्कणप्रोज्ज्वलं ,
किङ्किणीमञ्जुलं श्यामलं तं भजे ॥८॥

अच्युतस्याष्टकं यः पठेदिष्टदं ,
प्रेमतः प्रत्यहं पूरुषः सस्पृहम् ।
वृत्ततः सुन्दरं कर्तृविश्वम्भरस्तस्य ,
वश्यो हरिर्जायते सत्वरम् ॥ ॥९॥

॥ इति श्री शंकराचार्य कृत अच्युतस्याष्टकं सम्पूर्णम् ॥

॥ श्रीकृष्णाष्टकम् स्तोत्रम् ॥

नित्यानन्दैकरसं सच्चिन्मात्रं स्वयं ज्योतिः ।
पुरुषोत्तममजमीशं वन्दे श्रीयादवाधीशम् ॥

भजे व्रजैक मण्डनं समस्त पापखण्डनं,
स्वभक्त चित्त रंजनं सदैव नन्द नन्दनम् ।
सुपिच्छ गुच्छ मस्तकं सुनाद वेणु हस्तकं,
अनंग रंग सागरं नमामि कृष्ण नागरम् ॥१॥

मनोज गर्व मोचनं विशाल लोल लोचनं,
विधूत गोप शोचनं नमामि पद्म लोचनम् ।
करारविन्द भूधरं स्मितावलोक सुन्दरं,
महेन्द्र मान दारणं नमामि कृष्ण वारणम् ॥२॥

कदम्ब सून कुण्डलं सुचारु गण्ड मण्डलं,
व्रजांगनैक वल्लभं नमामि कृष्ण दुर्लभम्।
यशोदया समोदया सगोपया सनन्दया,
युतं सुखैक दायकं नमामि गोप नायकम् ॥३॥

सदैव पाद पंकजं मदीय मानसे निजं,
दधान मुक्त मालकं नमामि नन्द बालकम् ।
समस्त दोष शोषणं समस्त लोक पोषणं,
समस्त गोप मानसं नमामि नन्द लालसम् ॥४॥

भुवो भरावतारकं भवाब्धि कर्ण धारकं ,
यशोमती किशोरकं नमामि चित्त चोरकम् ।
दृगन्त कान्त भंगिनं सदा सदालिसंगिनं,
दिने दिने नवं नवं नमामि नन्द सम्भवम् ॥५॥

गुणाकरं सुखाकरं कृपाकरं कृपापरं,
सुरद्विषन्नि कन्दनं नमामि गोप नन्दनम् ।
नवीनगोप नागरं नवीन केलि लम्पटं,
नमामि मेघ सुन्दरं तडित् प्रभाल सत्पटम् ॥६॥

समस्त गोप नन्दनं हृदम्बुजैक मोदनं,
नमामि कुंज मध्यगं प्रसन्न भानु शोभनम् ।
निकाम काम दायकं दृगन्त चारु सायकं,
रसाल वेणु गायकं नमामि कुंज नायकम् ॥७॥

विदग्ध गोपिका मनो मनोज्ञा तल्प शायिनम्,
नमामि कुंज कानने प्रवृद्ध वह्नि पायिनम् ।
किशोरकान्ति रंजितम द्रुगन्जनम् सुशोभितम,
गजेन्द्र मोक्ष कारिणम नमामि श्री निहारिणम ॥८॥

यदा तदा यथा तथा तथैव कृष्ण सत्कथा,
मया सदैव गीयतां तथा कृपा विधीयताम् ।
प्रमाणि काष्टकद्वयं जपत्यधीत्य यः पुमान,
भवेत् सनन्द नन्दने भवे भवे सुभक्तिमान ॥९॥

॥ इति श्रीमच्छंकराचार्य कृतं श्रीकृष्णाष्टकम् स्तोत्रम् सम्पूर्णम् ॥

॥ श्री कृष्णाष्टकम् - २ ॥

श्रियाऽऽश्लिष्टो विष्णुः स्थिरचरगुरुर्वेदविषयो
धियां साक्षी शुद्धो हरिरसुरहन्ताब्जनयनः ।
गदी शङ्खी चक्री विमलवनमाली स्थिररुचिः
शरण्यो लोकेशो मम भवतु कृष्णोऽक्षिविषयः ॥ १॥

यतः सर्वं जातं वियदनिलमुख्यं जगदिदम्
स्थितौ निःशेषं योऽवति निजसुखांशेन मधुहा ।
लये सर्वं स्वस्मिन्हरति कलया यस्तु स विभुः
शरण्यो लोकेशो मम भवतु कृष्णोऽक्षिविषयः ॥ २॥

असूनायम्यादौ यमनियममुख्यैः सुकरणैः
निरुद्ध्येदं चित्तं हृदि विलयमानीय सकलम् ।
यमीड्यं पश्यन्ति प्रवरमतयो मायिनमसौ
शरण्यो लोकेशो मम भवतु कृष्णोऽक्षिविषयः ॥ ३॥

पृथिव्यां तिष्ठन्यो यमयति महीं वेद न धरा
यमित्यादौ वेदो वदति जगतामीशममलम् ।
नियन्तारं ध्येयं मुनिसुरनृणां मोक्षदमसौ
शरण्यो लोकेशो मम भवतु कृष्णोऽक्षिविषयः ॥ ४॥

महेन्द्रादिर्देवो जयति दितिजान्यस्य बलतो
न कस्य स्वातन्त्र्यं क्वचिदपि कृतौ यत्कृतिमृते ।
बलारातेर्गर्वं परिहरति योऽसौ विजयिनः
शरण्यो लोकेशो मम भवतु कृष्णोऽक्षिविषयः ॥ ५॥

विना यस्य ध्यानं व्रजति पशुतां सूकरमुखां
विना यस्य ज्ञानं जनिमृतिभयं याति जनता ।
विना यस्य स्मृत्या कृमिशतजनिं याति स विभुः
शरण्यो लोकेशो मम भवतु कृष्णोऽक्षिविषयः ॥ ६॥

नरातङ्कोत्तङ्कः शरणशरणो भ्रान्तिहरणो
घनश्यामो वामो व्रजशिशुवयस्योऽर्जुनसखः ।
स्वयम्भूर्भूतानां जनक उचिताचारसुखदः
शरण्यो लोकेशो मम भवतु कृष्णोऽक्षिविषयः ॥ ७॥

यदा धर्मग्लानिर्भवति जगतां क्षोभकरणी
तदा लोकस्वामी प्रकटितवपुः सेतुधृदजः ।
सतां धाता स्वच्छो निगमगणगीतो व्रजपतिः
शरण्यो लोकेशो मम भवतु कृष्णोऽक्षिविषयः ॥ ८॥

॥ इति श्रीमच्छंकराचार्य कृतं श्रीकृष्णाष्टकम् स्तोत्रम् सम्पूर्णम् ॥

॥ श्री गोविन्दाष्टकम् ॥

सत्यं ज्ञानमनन्तं नित्यमनाकाशं परमाकाशम् ।
गोष्ठप्राङ्गणरिङ्खणलोलमनायासं परमायासम् ।
मायाकल्पितनानाकारमनाकारं भुवनाकारम् ।
क्ष्मामानाथमनाथं प्रणमत गोविन्दं परमानन्दम् ॥१॥

मृत्स्नामत्सीहेति यशोदाताडनशैशव सन्त्रासम् ।
व्यादितवक्त्रालोकितलोकालोकचतुर्दशलोकालिम् ।
लोकत्रयपुरमूलस्तम्भं लोकालोकमनालोकम् ।
लोकेशं परमेशं प्रणमत गोविन्दं परमानन्दम् ॥२॥

त्रैविष्टपरिपुवीरघ्नं क्षितिभारघ्नं भवरोगघ्नम् ।
कैवल्यं नवनीताहारमनाहारं भुवनाहारम् ।
वैमल्यस्फुटचेतोवृत्तिविशेषाभासमनाभासम् ।
शैवं केवलशान्तं प्रणमत गोविन्दं परमानन्दम् ॥३॥

गोपालं प्रभुलीलाविग्रहगोपालं कुलगोपालम् ।
गोपीखेलनगोवर्धनधृतिलीलालालितगोपालम् ।
गोभिर्निगदित गोविन्दस्फुटनामानं बहुनामानम् ।
गोपीगोचरदूरं प्रणमत गोविन्दं परमानन्दम् ॥४॥

गोपीमण्डलगोष्ठीभेदं भेदावस्थमभेदाभम् ।
शश्वद्गोखुरनिर्धूतोद्गत धूलीधूसरसौभाग्यम् ।
श्रद्धाभक्तिगृहीतानन्दमचिन्त्यं चिन्तितसद्भावम् ।
चिन्तामणिमहिमानं प्रणमत गोविन्दं परमानन्दम् ॥ ५॥

स्नानव्याकुलयोषिद्वस्त्रमुपादायागमुपारूढम् ।
व्यादित्सन्तीरथ दिग्वस्त्रा दातुमुपाकर्षन्तं ताः
निर्धूतद्वयशोकविमोहं बुद्धं बुद्धेरन्तस्थम् ।
सत्तामात्रशरीरं प्रणमत गोविन्दं परमानन्दम् ॥ ६॥

कान्तं कारणकारणमादिमनादिं कालधनाभासम् ।
कालिन्दीगतकालियशिरसि सुनृत्यन्तम् मुहुरत्यन्तम् ।
कालं कालकलातीतं कलिताशेषं कलिदोषघ्नम् ।
कालत्रयगतिहेतुं प्रणमत गोविन्दं परमानन्दम् ॥ ७॥

बृन्दावनभुवि बृन्दारकगणबृन्दाराधितवन्देहम् ।
कुन्दाभामलमन्दस्मेरसुधानन्दं सुहृदानन्दम् ।
वन्द्याशेष महामुनि मानस वन्द्यानन्दपदद्वन्द्वम् ।
वन्द्याशेषगुणाब्धिं प्रणमत गोविन्दं परमानन्दम् ॥ ८॥

गोविन्दाष्टकमेतदधीते गोविन्दार्पितचेता यः ।
गोविन्दाच्युत माधव विष्णो गोकुलनायक कृष्णेति ।
गोविन्दाङ्घ्रि सरोजध्यानसुधाजलधौतसमस्ताघः ।
गोविन्दं परमानन्दामृतमन्तस्थं स तमभ्येति ॥ ९॥

॥ इति श्री शङ्कराचार्य विरचित श्रीगोविन्दाष्टकं समाप्तं ॥

॥ श्रीगोविन्द दामोदर स्तोत्रम् ॥

विपत्ति के समय श्रद्धा भक्ति पूर्वक इस स्तोत्र का पाठ किया जाए तो मनुष्य के सारे दु:ख स्वयं भगवान हर लेते हैं। और आनन्दामृत प्रदान करने के साथ मनुष्य को मोक्ष भी प्रदान करता है।

करारविन्दे न पदारविन्दं
मुखारविन्दे विनिवेशयन्तं ।
वटस्य पत्रस्य पुटे शयानं.
बालं मुकुन्दं मनसा स्मरामि ॥ ॥१॥

श्रीकृष्ण गोविन्द हरे मुरारे
हे नाथ नारायण वासुदेव ।
जिह्वे पिबस्वा मृतमेत देव
गोविन्द दामोदर माधवेति ॥ ॥२॥

विक्रेतुकामाखिल गोपकन्या
मुरारी पादार्पित चित्तवृत्तिः।
दध्यादिकं मोहवशादवोचद्
गोविन्द दामोदर माधवेति ॥ ॥३॥

गृहे-गृहे गोपवधू कदम्बा:
सर्वे मिलित्वा समवाप्ययोगम् ।
पुण्यानि नामानि पठन्ति नित्यं
गोविन्द दामोदर माधवेति ॥ ॥४॥

सुखे शयाना निलये निजेऽपि
नामानि विष्णो: प्रवदन्ति मर्त्या:।
ते निश्चितं तन्मयतां व्रजन्ति
गोविन्द दामोदर माधवेति ॥ ॥५॥

जिह्वे सदैवं भज सुन्दराणि
नामानि कृष्णस्य मनोहराणि ।
समस्त भक्तार्ति विनाशनानि
गोविन्द दामोदर माधवेति ॥ ॥६॥

सुखा वसाने इदमेव सारं
दु:खा वसाने इदमेव ज्ञेयम् ।
देहा वसाने इदमेव जाप्यं
गोविन्द दामोदर माधवेति ॥ ॥७॥

जिह्वे रसज्ञे मधुर प्रियत्वं
सत्यं हितं त्वां परमं वदामि
आवर्णेय त्वं मधुराक्षराणि
गोविन्द दामोदर माधवेति ॥ ॥८॥

त्वमेव याचे मम देहि जिह्वे
समागते दण्डधरे कृतान्ते
वक्तव्यमेवं मधुरं सुभक्त्या
गोविन्द दामोदर माधवेति ॥ ॥९॥

श्री कृष्ण राधावर गोकुलेश
गोपाल गोवर्धन नाथ विष्णो ।
जिह्वे पिबस्वा मृतमेतदेव
गोविन्द दामोदर माधवेति ॥ ॥१०॥

॥ इति श्री बिल्व मंगलाचार्य विरचितं श्रीगोविन्द दामोदर स्तोत्रम् सम्पूर्णम् ॥

॥ ज्वर कृत कृष्ण स्तोत्रम् ॥

- विद्राविते भूतगणे ज्वरस्तु त्रिशिरास्त्रिपात् ।
  अभ्यपद्यत दाशार्हं दहन्निव दिशो दश ।
  अथ नारायणो देवस्तं दृष्ट्वा व्यसृजज्ज्वरम् ॥ ॥ १ ॥

- माहेश्वरो वैष्णवश्च युयुधाते ज्वरावुभौ ।
  माहेश्वरः समाक्रन्दन्वैष्णवेन बलार्दितः ॥ ॥ २ ॥

- अलब्ध्वाऽभयमन्यत्र भीतो माहेश्वरो ज्वरः ।
  शरणार्थी हृषीकेशं तुष्टाव प्रयतांजलिः ॥ ॥ ३ ॥

- ज्वर उवाच

  नमामि त्वाऽनंतशक्तिं परेशं सर्वात्मानं केवलं ज्ञप्तिमात्रम् ।
  विश्वोत्पत्तिस्थानसंरोधहेतुं यत्तद्ब्रह्म ब्रह्मलिंगं प्रशांतम् ॥॥ ४ ॥

  - कालो दैवं कर्म जीवः स्वभावो द्रव्यं क्षेत्रं प्राण आत्मा विकारः ।
    तत्संघातो बीजरोहप्रवाहस्त्वन्मायैषा तन्निषेधं प्रपद्ये ॥ ५ ॥

  - नानाभावैर्लीलयैवोपपन्नैर्देवान्साधूंल्लोकसेतून् बिभर्षि ।
    हंस्युन्मार्गान्हिंसया वर्तमानान् जन्मैतत्ते भारहाराय भूमेः ॥ ६ ॥

  - तप्तोऽहं ते तेजसा दुःसहेन शीतोग्रेणात्युल्बणेन ज्वरेण ।
    तावत्तापो देहिनां तेऽङ्घ्रिमूलं नो सेवेरन्यावदाशानुबद्धाः ॥ ७ ॥

- श्रीभगवानुवाच

  त्रिशिरस्ते प्रसन्नोऽस्मि व्येतु ते मज्ज्वराद्भयम् ।
  यो नौ स्मरति संवादं तस्य त्वन्न भवेद्भयम् ॥ ॥ ८ ॥

  - इत्युक्तोऽच्युतमानम्य गतोमाहेश्वरो ज्वरः ।
    बाणस्तु रथमारूढः प्रागाद्योत्स्यन् जनार्दनम् ॥ ॥ ९ ॥

॥ इति श्री ज्वर कृत कृष्ण स्तोत्रम् संपूर्णम् ।

॥ देवा कृत गर्भ स्तुति ॥

- **देवा ऊचुः**

जगद्योनिरयोनिस्त्वमनन्तोऽव्यय एव च ।
ज्योतिःस्वरूपो ह्यनिशः सगुणो निर्गुणो महान् ॥ ॥ १॥

- भक्तानुरोधात्साकारो निराकारो निरङ्कुशः ।
निर्व्यूहो निखिलाधारो निःशङ्को निरुपद्रवः ॥ ॥ २॥

- निरुपाधिश्च निर्लिप्तो निरीहो निधनान्तकः ।
स्वात्मारामः पूर्णकामोऽनिमिषो नित्य एव च ॥ ॥ ३॥

- स्वेच्छामयः सर्वहेतुः सर्वः सर्वगुणाश्रयः ।
सर्वदो दुःखदो दुर्गो दुर्जनान्तक एव च ॥ ॥ ४॥

- सुभगो दुर्भगो वाग्मी दुराराध्यो दुरत्ययः ।
वेदहेतुश्च वेदश्च वेदाङ्गो वेदविद्विभुः ॥ ॥ ५॥

- इत्येवमुक्त्वा देवाश्च प्रणेमुश्च मुहुर्मुहुः ।
हर्षाश्रुलोचनाः सर्वे ववृषुः कुसुमानि च ॥ ॥ ६॥

- द्विचत्वारिंशन्नामानि प्रातरुत्थाय यः पठेत् ।
दृढां भक्तिं हरेर्दास्यं लभते वाञ्छितं फलम् ॥ ॥ ७॥

- इत्येवं स्तवनं कृत्वा देवास्ते स्वालयं ययुः ।
बभूव जलवृष्टिश्च निश्चेष्टा मथुरापुरी ॥ ॥ ८॥

॥ इति श्री ब्रह्मवैवर्ते देव कृता गर्भस्तुतिः सम्पूर्णम् ॥

॥ चर्पटपञ्जरिका स्तोत्रम् ॥

भज गोविन्दम् भज गोविन्दम् गोविन्दम् भज मूढ़मते ।
संप्राप्ते सन्निहिते मरणे न हि न हि रक्षति डुकृञ् करणे ॥

दिनमपि रजनी सायं प्रातः
शिशिरवसन्तौ पुनरायातः।
कालः क्रीडति गच्छत्यायुः
तदपि न मुञ्चत्याशावायुः ॥ ॥१॥ भज...

अग्रे वह्निः पृष्ठे भानुः
रात्रौ चिबुकसमर्पितजानुः।
करतलभिक्षा तरुतलवासः
तदपि न मुञ्चत्याशापाशः ॥ ॥२॥ भज...

यावद्वित्तोपार्जनसक्तः
तावन्निजपरिवारो रक्तः।
पश्चाद्धावति जर्जरदेहे
वार्तां पृच्छति कोऽपि न गेहे ॥३॥ भज...

जटिलो मुण्डी लुञ्चितकेशः
काषायाम्बरबहुकृतवेषः।
पश्यन्नपि च न पश्यति लोकः
उदरनिमित्तं बहुकृतशोकः ॥ ॥४॥ भज...

भगवद् गीता किञ्चितधीता
गङ्गाजल लवकणिका पीता।
सकृदपि यस्य मुरारिसमर्चा
तस्य यमः किं कुरुते चर्चा ॥ ॥५॥ भज...

अङ्गं गलितं पलितं मुण्डं
दशनविहीनं जातं तुण्डम्।
वृध्दो याति गृहीत्वा दण्डं
तदपि न मुञ्चत्याशापिण्डम् ॥६॥ भज...

बालस्तावत्क्रीडासक्तः
तरुणस्तावत्तरुणीरक्तः।
वृध्दस्तावच्चिन्तामग्नः
परे ब्रह्मणि कोऽपि न लग्नः ॥७॥ भज...

पुनरपि जननं पुनरपि मरणं
पुनरपि जननी जठरे शयनम्।
इह संसारे खलु दुस्तारे
कृपयापारे पाहि मुरारे ॥ ॥८॥ भज...

पुनरपि रजनी पुनरपि दिवसः
पुनरपि पक्षः पुनरपि मासः।
पुनरप्ययनं पुनरपि वर्षम्
तदपि न मुञ्चत्याशामर्षम् ॥ ॥९॥ भज...

वयसि गते कः कामविकारः
शुष्के नीरे कः कासारः।
नष्टे द्रव्ये कः परिवारः
ज्ञाते तत्वे कः संसारः ॥ ॥१०॥ भज...

नारीस्तनभरनाभिनिवेशं
मिथ्यामायामोहावेशम्।
एतन्मांसवसादि विकारं
मनसि विचारय बारम्बारम् ॥११॥ भज...

कस्त्वं कोऽहं कुत आयातः
का मे जननी को मे तातः।
इति परभावय सर्वमसारम्
विश्वं त्यक्त्वा स्वप्नविचारम् ॥१२॥ भज...

गेयं गीतानामसहस्रम्
ध्येयं श्रीपतिरूपमजस्रम्।
नेयं सज्जनसङ्गे चित्तम्
देयं दीनजनाय च वित्तम् ॥ ॥१३॥ भज...

यावज्जीवो निवसति देहे
कुशलं तावत्पृच्छति गेहे।
गतवति वायौ देहापाये
भार्या बिभ्यति तस्मिन्काये ॥ ॥१४॥ भज...

सुखतः क्रियते रामाभोगः
पश्चाद्धन्त शरीरे रोगः।
यद्यपि लोके मरणं शरणम्
तदपि न मुञ्चति पापाचरणम् ॥१५॥ भज...

रथ्याचर्पटविरचितकन्थः
पुण्यापुण्यविवर्जितपन्थः।
नाहं न त्वं नायं लोकः
तदपि किमर्थं क्रियते शोकः ॥१६॥ भज...

कुरुते गङ्गासागरगमनं
व्रतपरिपालनमथवा दानम्।
ज्ञानविहीने सर्वमतेन
मुक्तिर्भवति न जन्मशतेन ॥ ॥१७॥ भज...

॥ इति श्रीमच्छंकराचार्य विरचितं चर्पटपंजरिका स्तोत्रम् संपूर्णम् ॥

॥ शालिग्राम स्तोत्रम् ॥

पुराणों के अनुसार भगवान शिव और विष्णु ने जगत के कल्याण हेतु पार्थिव रुप धारण किया, जिस प्रकार नर्मदा नदी में निकलने वाले पत्थर नर्मदेश्वर या बाण लिंग साक्षात् शिव स्वरुप माने जाते है, उसी प्रकार नेपाल में गंडकी नदी के तल में पाए जाने वाले काले रंग के चिकने अंडाकार पत्थर भगवान विष्णु का रुप माना जाता है। जिसकी पूजा करके मनुष्य सभी पापों से मुक्त होजाते हैं, और पूण्य को प्राप्त करतें है।

- **विनियोग** — अस्य श्रीशालिग्रामस्तोत्रमन्त्रस्य श्रीभगवान् ऋषिः, नारायणो देवता, अनुष्टुप् छन्दः, श्रीशालिग्रामस्तोत्रमन्त्रजपे विनियोगः ॥

- **युधिष्ठिर उवाच**

श्रीदेवदेव देवेश देवतार्चनमुत्तमम् ।
तत्सर्वं श्रोतुमिच्छामि ब्रूहि मे पुरुषोत्तम ॥ ॥ १॥

- **श्रीभगवानुवाच**

गण्डक्यां चोत्तरे तीरे गिरिराजस्य दक्षिणे ।
दशयोजनविस्तीर्णा महाक्षेत्रवसुन्धरा ॥ ॥ २॥

- **शालिग्रामो भवेद्देवो देवी द्वारावती भवेत् ।**
  उभयोः सङ्गमो यत्र मुक्तिस्तत्र न संशयः ॥ ॥ ३॥
- **शालिग्रामशिला यत्र यत्र द्वारावती शिला ।**
  उभयोः सङ्गमो यत्र मुक्तिस्तत्र न संशयः ॥ ॥ ४॥
- **आजन्मकृतपापानां प्रायश्चित्तं य इच्छति ।**
  शालिग्रामशिलावारि पापहारि नमोऽस्तु ते ॥ ॥ ५॥
- **अकालमृत्युहरणं सर्वव्याधिविनाशनम् ।**
  विष्णोः पादोदकं पीत्वा शिरसा धारयाम्यहम् ॥ ॥ ६॥
- **शङ्खमध्ये स्थितं तोयं भ्रामितं केशवोपरि ।**
  अङ्गलग्नं मनुष्याणां ब्रह्महत्यादिकं दहेत् ॥ ॥ ७॥
- **स्नानोदकं पिवेन्नित्यं चक्राङ्कितशिलोद्भवम् ।**
  प्रक्षाल्य शुद्धं तत्तोयं ब्रह्महत्यां व्यपोहति ॥ ॥ ८॥
- **अग्निष्टोमसहस्राणि वाजपेयशतानि च ।**
  सम्यक् फलमवाप्नोति विष्णोर्नैवेद्यभक्षणात् ॥ ॥ ९॥
- **नैवेद्ययुक्तां तुलसीं च मिश्रितां विशेषतः पादजलेन विष्णोः ।**
  योऽश्नाति नित्यं पुरतो मुरारेः प्राप्नोति यज्ञायुतकोटिपुण्यम् ॥ १०॥

- खण्डिताः स्फुटिता भिन्ना वन्हिदग्धास्तथैव च ।
  शालिग्रामशिला यत्र तत्र दोषो न विद्यते ॥ ॥११॥
- न मन्त्रः पूजनं नैव न तीर्थं न च भावना ।
  न स्तुतिर्नोपचारश्च शालिग्रामशिलार्चने ॥ ॥१२॥
- ब्रह्महत्यादिकं पापं मनोवाक्कायसम्भवम् ।
  शीघ्रं नश्यति तत्सर्वं शालिग्रामशिलार्चनात् ॥ ॥ १३॥
- नानावर्णमयं चैव नानाभोगेन वेष्टितम् ।
  तथा वरप्रसादेन लक्ष्मीकान्तं वदाम्यहम् ॥ ॥१४॥
- नारायणोद्भवो देवश्चक्रमध्ये च कर्मणा ।
  तथा वरप्रसादेन लक्ष्मीकान्तं वदाम्यहम् ॥ ॥१५॥
- कृष्णे शिलातले यत्र सूक्ष्मं चक्रं च दृश्यते ।
  सौभाग्यं सन्ततिं धत्ते सर्व सौख्यं ददाति च ॥ ॥१६॥
- वासुदेवस्य चिह्नानि दृष्ट्वा पापैः प्रमुच्यते ।
  श्रीधरः सुकरे वामे हरिद्वर्णस्तु दृश्यते ॥ ॥१७॥
- वराहरूपिणं देवं कूर्माङ्गैरपि चिह्नितम् ।
  गोपदं तत्र दृश्येत वाराहं वामनं तथा ॥ ॥१८॥
- पीतवर्णं तु देवानां रक्तवर्णं भयावहम् ।
  नारसिंहो भवेद्देवो मोक्षदं च प्रकीर्तितम्॥ ॥१९॥
- शङ्खचक्रगदाकूर्माः शङ्खो यत्र प्रदृश्यते ।
  शङ्खवर्णस्य देवानां वामे देवस्य लक्षणम् ॥ ॥२०॥
- दामोदरं तथा स्थूलं मध्ये चक्रं प्रतिष्ठितम् ।
  पूर्णद्वारेण सङ्कीर्णा पीतरेखा च दृश्यते ॥ ॥२१॥
- छत्राकारे भवेद्राज्यं वर्तुले च महाश्रियः ।
  चिपिटे च महादुःखं शूलाग्रे तु रणं ध्रुवम् ॥ ॥२२॥
- ललाटे शेषभोगस्तु शिरोपरि सुकाञ्चनम् ।
  चक्रकाञ्चनवर्णानां वामदेवस्य लक्षणम् ॥ ॥२३॥
- वामपार्श्वे च वै चक्रे कृष्णवर्णस्तु पिङ्गलम् ।
  लक्ष्मीनृसिंहदेवानां पृथग्वर्णस्तु दृश्यते ॥ ॥२४॥

- लम्बोष्ठे च दरिद्रं स्यात्पिङ्गले हानिरेव च ।
  लग्नचक्रे भवेद्याधिर्विदारे मरणं ध्रुवम् ॥ ॥२५॥
- पादोदकं च निर्माल्यं मस्तके धारयेत्सदा ।
  विष्णोर्दृष्टं भक्षितव्यं तुलसीदलमिश्रितम् ॥ ॥२६॥
- कल्पकोटिसहस्राणि वैकुण्ठे वसते सदा ।
  शालिग्रामशिलाबिन्दुर्हत्याकोटिविनाशनः॥ ॥२७॥
- तस्मात्सम्पूजयेद्ध्यात्वा पूजितं चापि सर्वदा ।
  शालिग्रामशिलास्तोत्रं यः पठेच्च द्विजोत्तमः॥ ॥२८॥
- स गच्छेत्परमं स्थानं यत्र लोकेश्वरो हरिः ।
  सर्वपापविनिर्मुक्तो विष्णुलोकं स गच्छति ॥ ॥२९॥
- दशावतारो देवानां पृथग्वर्णस्तु दृश्यते ।
  ईप्सितं लभते राज्यं विष्णुपूजामनुक्रमात् ॥ ॥३०॥
- कोट्यो हि ब्रह्महत्यानामगम्यागम्यकोटयः ।
  ताः सर्वा नाशमायान्ति विष्णुनैवेद्यभक्षणात् ॥ ॥३१॥
- विष्णोः पादोदकं पीत्वा कोटिजन्माघनाशनम् ।
  तस्मादष्टगुणं पापं भूमौ बिन्दुनिपातनात् ॥ ॥३२॥

॥ इति श्री भविष्योत्तर पुराणे श्री कृष्ण-युधिष्ठिर संवादे शालिग्राम स्तोत्रम् सम्पूर्णम् ॥

॥ सन्तान गोपाल स्तोत्रम् ॥

श्री सन्तानगोपाल स्तोत्र भगवान श्री कृष्ण जी के बाल रूप को समर्पित हैं ! जिन्हें संतान की प्राप्ति में परेशानी आ रही हो ऐसे दंपतियों के लिए श्री सन्तानगोपाल स्तोत्र का पाठ एक वरदान साबित होता हैं ! श्री सन्तानगोपाल स्तोत्र का पाठ करने से बच्चे सुरक्षित तो रहते है साथ में बच्चे की बुद्दि तेज़ होती हैं !

- **मूल मन्त्र:** **ॐ श्रीं ह्रीं क्लीं ग्लौं देवकीसुत गोविन्द वासुदेव जगत्पते ।**
  देहि मे तनयं कृष्ण त्वामहं शरणं गतः ॥
  ॐ नमो भगवते वासुदेवाय ।

सन्तानगोपाल स्तोत्रम्

श्रीशं कमलपत्राक्षं देवकीनन्दनं हरिम् ।
सुतसंप्राप्तये कृष्णं नमामि मधुसूदनम् ॥॥ १॥

नमाम्यहं वासुदेवं सुतसंप्राप्तये हरिम् ।
यशोदाङ्कगतं बालं गोपालं नन्दनन्दनम् ॥ २॥

अस्माकं पुत्रलाभाय गोविन्दं मुनिवन्दितम् ।
नमाम्यहं वासुदेवं देवकीनन्दनं सदा ॥ ॥ ३॥

गोपालं डिम्भकं वन्दे कमलापतिमच्युतम् ।
पुत्रसंप्राप्तये कृष्णं नमामि यदुपुङ्गवम् ॥ ४॥

पुत्रकामेष्टिफलदं कञ्जाक्षं कमलापतिम् ।
देवकीनन्दनं वन्दे सुतसम्प्राप्तये मम ॥ ॥ ५॥

पद्मापते पद्मनेत्रे पद्मनाभ जनार्दन ।
देहि मे तनयं श्रीश वासुदेव जगत्पते ॥ ॥ ६॥

यशोदाङ्कगतं बालं गोविन्दं मुनिवन्दितम् ।
अस्माकं पुत्र लाभाय नमामि श्रीशमच्युतम् ॥७॥

श्रीपते देवदेवेश दीनार्तिहरणाच्युत ।
गोविन्द मे सुतं देहि नमामि त्वां जनार्दन ॥८॥

भक्तकामद गोविन्द भक्तं रक्ष शुभप्रद ।
देहि मे तनयं कृष्ण रुक्मिणीवल्लभ प्रभो ॥९॥

रुक्मिणीनाथ सर्वेश देहि मे तनयं सदा ।
भक्तमन्दार पद्माक्ष त्वामहं शरणं गतः ॥१०॥

देवकीसुत गोविन्द वासुदेव जगत्पते ।
देहि मे तनयं कृष्ण त्वामहं शरणं गतः ॥११॥

वासुदेव जगद्वन्द्य श्रीपते पुरुषोत्तम ।
देहि मे तनयं कृष्ण त्वामहं शरणं गतः ॥१२॥

कञ्जाक्ष कमलानाथ परकारुणिकोत्तम ।
देहि मे तनयं कृष्ण त्वामहं शरणं गतः ॥१३॥

लक्ष्मीपते पद्मनाभ मुकुन्द मुनिवन्दित ।
देहि मे तनयं कृष्ण त्वामहं शरणं गतः ॥१४॥

कार्यकारणरूपाय वासुदेवाय ते सदा ।
नमामि पुत्रलाभार्थं सुखदाय बुधाय ते ॥१५॥

राजीवनेत्र श्रीराम रावणारे हरे कवे ।
तुभ्यं नमामि देवेश तनयं देहि मे हरे ॥ ॥१६॥

अस्माकं पुत्रलाभाय भजामि त्वां जगत्पते ।
देहि मे तनयं कृष्ण वासुदेव रमापते ॥ ॥१७॥

श्रीमानिनीमानचोर गोपीवस्त्रापहारक ।
देहि मे तनयं कृष्ण वासुदेव जगत्पते ॥ ॥१८॥

अस्माकं पुत्रसंप्राप्तिं कुरुष्व यदुनन्दन ।
रमापते वासुदेव मुकुन्द मुनिवन्दित ॥ ॥१९॥

वासुदेव सुतं देहि तनयं देहि माधव ।
पुत्रं मे देहि श्रीकृष्ण वत्सं देहि महाप्रभो ॥२०॥

डिम्भकं देहि श्रीकृष्ण आत्मजं देहि राघव ।
भक्तमन्दार मे देहि तनयं नन्दनन्दन ॥ ॥२१॥

नन्दनं देहि मे कृष्ण वासुदेव जगत्पते ।
कमलनाथ गोविन्द मुकुन्द मुनिवन्दित ॥२२॥

अन्यथा शरणं नास्ति त्वमेव शरणं मम ।
सुतं देहि श्रियं देहि श्रियं पुत्रं प्रदेहि मे ॥२३॥

यशोदास्तन्यपानज्ञं पिबन्तं यदुनन्दनं ।
वन्देऽहं पुत्रलाभार्थं कपिलाक्षं हरिं सदा ॥२४॥

नन्दनन्दन देवेश नन्दनं देहि मे प्रभो ।
रमापते वासुदेव श्रियं पुत्रं जगत्पते ॥ ॥२५॥

पुत्रं श्रियं श्रियं पुत्रं पुत्रं मे देहि माधव ।
अस्माकं दीनवाक्यस्य अवधारय श्रीपते ॥२६॥

गोपाल डिम्भ गोविन्द वासुदेव रमापते ।
अस्माकं डिम्भकं देहि श्रियं देहि जगत्पते ॥२७॥

मद्वाञ्छितफलं देहि देवकीनन्दनाच्युत ।
मम पुत्रार्थितं धन्यं कुरुष्व यदुनन्दन ॥ ॥२८॥

याचेऽहं त्वां श्रियं पुत्रं देहि मे पुत्रसंपदम्।
भक्तचिन्तामणे राम कल्पवृक्ष महाप्रभो ॥२९॥

आत्मजं नन्दनं पुत्रं कुमारं डिम्भकं सुतम् ।
अर्भकं तनयं देहि सदा मे रघुनन्दन ॥ ॥३०॥

वन्दे सन्तानगोपालं माधवं भक्तकामदम् ।
अस्माकं पुत्रसंप्राप्त्यै सदा गोविन्दमच्युतम् ॥३१॥

ॐकारयुक्तं गोपालं श्रीयुक्तं यदुनन्दनम् ।
क्लींयुक्तं देवकीपुत्रं नमामि यदुनायकम् ॥३२॥

वासुदेव मुकुन्देश गोविन्द माधवाच्युत ।
देहि मे तनयं कृष्ण रमानाथ महाप्रभो ॥ ॥३३॥

राजीवनेत्र गोविन्द कपिलाक्ष हरे प्रभो ।
समस्तकाम्यवरद देहि मे तनयं सदा ॥ ॥३४॥

अब्जपद्मनिभं पद्मवृन्दरूप जगत्पते ।
देहि मे वरसत्पुत्रं रमानायक माधव ॥ ॥३५॥

नन्दपाल धरापाल गोविन्द यदुनन्दन ।
देहि मे तनयं कृष्ण रुक्मिणीवल्लभ प्रभो ॥३६॥

दासमन्दार गोविन्द मुकुन्द माधवाच्युत ।
गोपाल पुण्डरीकाक्ष देहि मे तनयं श्रियम् ॥३७॥

यदुनायक पद्मेश नन्दगोपवधूसुत ।
देहि मे तनयं कृष्ण श्रीधर प्राणनायक ॥३८॥

अस्माकं वाञ्छितं देहि देहि पुत्रं रमापते ।
भगवन् कृष्ण सर्वेश वासुदेव जगत्पते ॥३९॥

रमाहृदय संभार सत्यभामा मनः प्रिय ।
देहि मे तनयं कृष्ण रुक्मिणीवल्लभ प्रभो ॥४०॥

चन्द्रसूर्याक्ष गोविन्द पुण्डरीकाक्ष माधव ।
अस्माकं भाग्यसत्पुत्रं देहि देव जगत्पते ॥४१॥

कारुण्यरूप पद्माक्ष पद्मनाभसमर्चित ।
देहि मे तनयं कृष्ण देवकीनन्दनन्दन ॥४२॥

देवकीसुत श्रीनाथ वासुदेव जगत्पते ।
समस्तकामफलद देहि मे तनयं सदा ॥४३॥

भक्तमन्दार गम्भीर शङ्कराच्युत माधव ।
देहि मे तनयं गोपबालवत्सल श्रीपते ॥४४॥

श्रीपते वासुदेवेश देवकीप्रियनन्दन ।
भक्तमन्दार मे देहि तनयं जगतां प्रभो ॥४५॥

जगन्नाथ रमानाथ भूमिनाथ दयानिधे ।
वासुदेवेश सर्वेश देहि मे तनयं प्रभो ॥ ॥४६॥

श्रीनाथ कमलपत्राक्ष वासुदेव जगत्पते ।
देहि मे तनयं कृष्ण त्वामहं शरणं गतः ॥४७॥

दासमन्दार गोविन्द भक्तचिन्तामणे प्रभो ।
देहि मे तनयं कृष्ण त्वामहं शरणं गतः ॥४८॥

गोविन्द पुण्डरीकाक्ष रमानाथ महाप्रभो ।
देहि मे तनयं कृष्ण त्वामहं शरणं गतः ॥४९॥

श्रीनाथ कमलपत्राक्ष गोविन्द मधुसूदन ।
मत्पुत्रफलसिद्ध्यर्थं भजामि त्वां जनार्दन ॥५०॥

स्तन्यं पिबन्तं जननीमुखांबुजं विलोक्य मन्दस्मितमुज्ज्वलाङ्गम् ।
स्पृशन्तमन्यस्तनमङ्गुलीभिर्वन्दे यशोदाङ्कगतं मुकुन्दम् ॥ ॥५१॥

याचेऽहं पुत्रसन्तानं भवन्तं पद्मलोचन ।
देहि मे तनयं कृष्ण त्वामहं शरणं गतः ॥५२॥

अस्माकं पुत्रसम्पत्तेश्चिन्तयामि जगत्पते ।
शीघ्रं मे देहि दातव्यं भवता मुनिवन्दित ॥५३॥

वासुदेव जगन्नाथ श्रीपते पुरुषोत्तम ।
कुरु मां पुत्रदत्तं च कृष्ण देवेन्द्रपूजित ॥५४॥

कुरु मां पुत्रदत्तं च यशोदाप्रियनन्दनम् ।
मह्यं च पुत्रसन्तानं दातव्यंभवता हरे ॥५५॥

वासुदेव जगन्नाथ गोविन्द देवकीसुत ।
देहि मे तनयं राम कौशल्याप्रियनन्दन ॥५६॥

पद्मपत्राक्ष गोविन्द विष्णो वामन माधव ।
देहि मे तनयं सीताप्राणनायक राघव ॥५७॥

कञ्जाक्ष कृष्ण देवेन्द्रमण्डित मुनिवन्दित ।
लक्ष्मणाग्रज श्रीराम देहि मे तनयं सदा ॥५८॥

देहि मे तनयं राम दशरथप्रियनन्दन ।
सीतानायक कञ्जाक्ष मुचुकुन्दवरप्रद ॥५९॥

विभीषणस्य या लङ्का प्रदत्ता भवता पुरा ।
अस्माकं तत्प्रकारेण तनयं देहि माधव ॥६०॥

भवदीयपदांभोजे चिन्तयामि निरन्तरम् ।
देहि मे तनयं सीताप्राणवल्लभ राघव ॥६१॥

राम मत्काम्यवरद पुत्रोत्पत्तिफलप्रद ।
देहि मे तनयं श्रीश कमलासनवन्दित ॥६२॥

राम राघव सीतेश लक्ष्मणानुज देहि मे ।
भाग्यवत्पुत्रसन्तानं दशरथप्रियनन्दन ।
देहि मे तनयं राम कृष्ण गोपाल माधव ॥६४॥

कृष्ण माधव गोविन्द वामनाच्युत शङ्कर ।
देहि मे तनयं श्रीश गोपबालकनायक ॥६५॥

गोपबाल महाधन्य गोविन्दाच्युत माधव ।
देहि मे तनयं कृष्ण वासुदेव जगत्पते ॥६६॥

दिशतु दिशतु पुत्रं देवकीनन्दनोऽयं दिशतु दिशतु शीघ्रं भाग्यवत्पुत्रलाभम् ।
दिशतु दिशतु शीघ्रं श्रीशो राघवो रामचन्द्रो दिशतु दिशतु पुत्रं वंश विस्तारहेतोः ॥६७॥

दीयतां वासुदेवेन तनयोमत्प्रियः सुतः ।
कुमारो नन्दनः सीतानायकेन सदा मम ॥६८॥

राम राघव गोविन्द देवकीसुत माधव ।
देहि मे तनयं श्रीश गोपबालकनायक ॥६९॥

वंशविस्तारकं पुत्रं देहि मे मधुसूदन ।
सुतं देहि सुतं देहि त्वामहं शरणं गतः ॥७०॥

ममाभीष्टसुतं देहि कंसारे माधवाच्युत ।
सुतं देहि सुतं देहि त्वामहं शरणं गतः ॥७१॥

चन्द्रार्ककल्पपर्यन्तं तनयं देहि माधव ।
सुतं देहि सुतं देहि त्वामहं शरणं गतः ॥ ॥७२॥

विद्यावन्तं बुद्धिमन्तं श्रीमन्तं तनयं सदा ।
देहि मे तनयं कृष्ण देवकीनन्दन प्रभो ॥७३॥

नमामि त्वां पद्मनेत्र सुतलाभाय कामदम् ।
मुकुन्दं पुण्डरीकाक्षं गोविन्दं मधुसूदनम् ॥७४॥

भगवन् कृष्ण गोविन्द सर्वकामफलप्रद ।
देहि मे तनयं स्वामिंस्त्वामहं शरणं गतः ॥७५॥

स्वामिंस्त्वं भगवन् राम कृष्न माधव कामद ।
देहि मे तनयं नित्यं त्वामहं शरणं गतः ॥७६॥

तनयं देहिओ गोविन्द कञ्जाक्ष कमलापते ।
सुतं देहि सुतं देहि त्वामहं शरणं गतः ॥७७॥

पद्मापते पद्मनेत्र प्रद्युम्न जनक प्रभो ।
सुतं देहि सुतं देहि त्वामहं शरणं गतः ॥७८॥

शङ्खचक्रगदाखड्गशार्ङ्गपाणे रमापते ।
देहि मे तनयं कृष्ण त्वामहं शरणं गतः ॥७९॥

नारायण रमानाथ राजीवपत्रलोचन ।
सुतं मे देहि देवेश पद्मपद्मानुवन्दित ॥ ॥८०॥

राम राघव गोविन्द देवकीवरनन्दन ।
रुक्मिणीनाथ सर्वेश नारदादिसुरार्चित ॥८१॥

देवकीसुत गोविन्द वासुदेव जगत्पते ।
देहि मे तनयं श्रीश गोपबालकनायक ॥८२॥

मुनिवन्दित गोविन्द रुक्मिणीवल्लभ प्रभो ।
देहि मे तनयं कृष्ण त्वामहं शरणं गतः ॥८३॥

गोपिकार्जितपङ्केजमरन्दासक्तमानस ।
देहि मे तनयं कृष्ण त्वामहं शरणं गतः ॥८४॥

रमाहृदयपङ्केजलोल माधव कामद ।
ममाभीष्टसुतं देहि त्वामहं शरणं गतः ॥८५॥

वासुदेव रमानाथ दासानां मङ्गलप्रद ।
देहि मे तनयं कृष्ण त्वामहं शरणं गतः ॥८६॥

कल्याणप्रद गोविन्द मुरारे मुनिवन्दित ।
देहि मे तनयं कृष्ण त्वामहं शरणं गतः ॥८७॥

पुत्रप्रद मुकुन्देश रुक्मिणीवल्लभ प्रभो ।
देहि मे तनयं कृष्ण त्वामहं शरणं गतः ॥८८॥

पुण्डरीकाक्ष गोविन्द वासुदेव जगत्पते ।
देहि मे तनयं कृष्ण त्वामहं शरणं गतः ॥८९॥

दयानिधे वासुदेव मुकुन्द मुनिवन्दित ।
देहि मे तनयं कृष्ण त्वामहं शरणं गतः ॥९०॥

पुत्रसम्पत्प्रदातारं गोविन्दं देवपूजितम् ।
वन्दामहे सदा कृष्णं पुत्र लाभ प्रदायिनम् ॥९१॥

कारुण्यनिधये गोपीवल्लभाय मुरारये ।
नमस्ते पुत्रलाभाय देहि मे तनयं विभो ॥९२॥

नमस्तस्मै रमेशाय रुमिणीवल्लभाय ते ।
देहि मे तनयं श्रीश गोपबालकनायक ॥९३॥

नमस्ते वासुदेवाय नित्यश्रीकामुकाय च ।
पुत्रदाय च सर्पेन्द्रशायिने रङ्गशायिने ॥९४॥

रङ्गशायिन् रमानाथ मङ्गलप्रद माधव ।
देहि मे तनयं श्रीश गोपबालकनायक ॥९५॥

दासस्य मे सुतं देहि दीनमन्दार राघव ।
सुतं देहि सुतं देहि पुत्रं देहि रमापते ॥ ॥९६॥

यशोदातनयाभीष्टपुत्रदानरतः सदा ।
देहि मे तनयं कृष्ण त्वामहं शरणं गतः ॥९७॥

मदिष्टदेव गोविन्द वासुदेव जनार्दन ।
देहि मे तनयं कृष्ण त्वामहं शरणं गतः ॥९८॥

नीतिमान् धनवान् पुत्रो विद्यावांश्च प्रजापते ।
भगवंस्त्वत्कृपायाश्च वासुदेवेन्द्रपूजित ॥९९॥

यःपठेत् पुत्रशतकं सोऽपि सत्पुत्रवान् भवेत ।
श्रीवासुदेवकथितं स्तोत्ररत्नं सुखाय च ॥१००॥

जपकाले पठेन्नित्यं पुत्रलाभं धनं श्रियम् ।
ऐश्वर्यं राजसम्मानं सद्यो याति न संशयः ॥१०१॥

॥ इति सन्तान गोपाल स्तोत्रम् सम्पुर्णम् ॥

॥ श्री कृष्ण कवचम् (त्रैलोक्य विजयम्) ॥

नारद उवाच

भगवञ्छ्रोतुमिच्छामि किं मन्त्रं भगवान्हरः ।
कृपया-ऽदात् परशुरामाय स्तोत्रं च वर्म च ॥ १॥

कोवाऽस्य मन्त्रस्याराध्यः किं फलं कवचस्य च ।
स्तवनस्य फलं किं वा तद्भवान्वक्तुमर्हसि ॥ २॥

नारायण उवाच

मन्त्राराध्यो हि भगवान् परिपूर्णतमः स्वयम् ।
गोलोकनाथः श्रीकृष्णो गोप-गोपीश्वरः प्रभुः ॥ ३॥

त्रैलोक्यविजयं नाम कवचं परमाद्भुतम् ।
स्तवराजं महापुण्यं भूतियोग-समुद्भवम् ॥ ४॥

मन्त्रं कल्पतरुं नाम सर्वकाम-फलप्रदम् ।
ददौ परशुरामाय रत्नपर्वत-सन्निधौ ॥ ५॥

स्वयंप्रभा-नदीतीरे पारिजात-वनान्तरे ।
आश्रमे लोकदेवस्य माधवस्य च सन्निधौ ॥ ६॥

महादेव उवाच

वत्सागच्छ महाभाग भृगुवंश-समुद्भव ।
पुत्राधिकोऽसि प्रेम्णा मे कवचग्रहणं कुरु ॥ ७॥

शृणु राम प्रवक्ष्यामि ब्रह्माण्डे परमाद्भुतम् ।
त्रैलोक्यविजयं नाम श्रीकृष्णस्य जयावहम् ॥ ८॥

श्रीकृष्णेन पुरा दत्तं गोलोके राधिकाश्रमे ।
रासमण्डल-मध्ये च मह्यं वृन्दावने वने ॥ ९॥

अतिगुह्यतरं तत्त्वं सर्व-मन्त्रौघविग्रहम् ।
पुण्यात्पुण्यतरं चैव परं स्नेहाद्वदामि ते ॥ १०॥

यद्धृत्वा पठनाद्देवी मूलप्रकृतिरीश्वरी ।
शुंभं निशुंभं महिषं रक्तबीजं जघान ह ॥ ११॥

यद्धृत्वाऽहं च जगतां संहर्ता सर्वतत्ववित् ।
अवध्यं त्रिपुरं पूर्वं दुरन्तमपि लीलया ॥ १२॥

यद्धृत्वा पठनाद्ब्रह्मा ससृजे सृष्टिमुत्तमाम् ।
यद्धृत्वा भगवाञ्छेषो विधत्ते विश्वमेव च ॥ १३॥

यद्धृत्वा कूर्मराजश्च शेषं धत्ते हि लीलया ।
यद्धृत्वा भगवान्वायुः विश्वाधारो विभुः स्वयम् ॥ १४॥

यद्धृत्वा वरुणः सिद्धः कुबेरश्च धनेश्वरः ।
यद्धृत्वा पठनादिन्द्रो देवानामधिपः स्वयम् ॥ १५॥

यद्धृत्वा भाति भुवने तेजोराशिः स्वयं रविः ।
यद्धृत्वा पठनाच्चन्द्रो महाबल-पराक्रमः ॥ १६॥

अगस्त्यः सागरान्सप्त यद्धृत्वा पठनात्पपौ ।
चकार तेजसा जीर्णं दैत्यं वातापिसंज्ञकम् ॥ १७॥

यद्धृत्वा पठनाद्देवी सर्वाधारा वसुन्धरा ।
यद्धृत्वा पठनात्पूता गङ्गा भुवनपावनी ॥ १८॥

यद्धृत्वा जगतां साक्षी धर्मो धर्मभृतां वरः ।
सर्व-विद्याधिदेवी सा यच्च धृत्वा सरस्वती ॥ १९॥

यद्धृत्वा जगतां लक्ष्मी-रन्नदात्री परात्परा ।
यद्धृत्वा पठनाद्वेदान् सावित्री सा सुषाव च ॥ २०॥

वेदाश्च धर्मवक्तारो यद्धृत्वा पठनाद् भृगो ।
यद्धृत्वा पठनाच्छुद्ध-स्तेजस्वी हव्यवाहनः ।
सनत्कुमारो भगवान्यद्धृत्वा ज्ञानिनां वरः ॥ २१॥

दातव्यं कृष्ण-भक्ताय साधवे च महात्मने ।
शठाय परशिष्याय दत्वा मृत्युमवाप्नुयात् ॥ २२॥

त्रैलोक्यविजयस्यास्य कवचस्य प्रजापतिः ।
ऋषिश्छन्दश्च गायत्री देवो रासेश्वरः स्वयम् ॥ २३॥

त्रैलोक्यविजय-प्राप्तौ विनियोगः प्रकीर्तितः ।
परात्परं च कवचं त्रिषु लोकेषु दुर्लभम् ॥ २४॥

प्रणवो मे शिरः पातु श्रीकृष्णाय नमः सदा ।
पायात्कपालं कृष्णाय स्वाहा पञ्चाक्षरः स्मृतः ॥२५॥

कृष्णेति पातु नेत्रे च कृष्ण स्वाहेति तारकम् ।
हरये नम इत्येवं भ्रूलतां पातु मे सदा ॥ २६॥

ॐ गोविन्दाय स्वाहेति नासिकां पातु सन्ततम् ।
गोपालाय नमो गण्डौ पातु मे सर्वतः सदा ॥ २७॥

ॐ नमो गोपाङ्गनेशाय कर्णौ पातु सदा मम ।
ॐ कृष्णाय नमः शश्वत्पातु मेऽधर-युग्मकम् ॥२८॥

ॐ गोविन्दाय स्वाहेति दन्तौघं मे सदाऽवतु ।
पातु कृष्णाय दन्ताधो दन्तोर्ध्वं क्लीं सदाऽवतु ॥२९॥

ॐ श्रीकृष्णाय स्वाहेति जिह्विकां पातु मे सदा ।
रासेश्वराय स्वाहेति तालुकं पातु मे सदा ॥ ३०॥

राधिकेशाय स्वाहेति कण्ठं पातु सदा मम ।
नमो गोपाङ्गनेशाय वक्षः पातु सदा मम ॥ ३१॥

ॐ गोपेशाय स्वाहेति स्कन्धं पातु सदा मम ।
नमः किशोर-वेषाय स्वाहा पृष्टं सदाऽवतु ॥ ३२॥

उदरं पातु मे नित्यं मुकुन्दाय नमः सदा ।
ॐ ह्रीं क्लीं कृष्णाय स्वाहेति करौ पातु सदा मम ॥ ३३॥

ॐ विष्णवे नमो बाहुयुग्मं पातु सदा मम ।
ॐ ह्रीं भगवते स्वाहा नखं पातु मे सदा ॥ ३४॥

ॐ नमो नारायणायेति नखरन्ध्रं सदाऽवतु ।
ॐ ह्रीं ह्रीं पद्मनाभाय नाभिं पातु सदा मम ॥ ३५॥

ॐ सर्वेशाय स्वाहेति कङ्कालं पातु मे सदा ।
ॐ गोपीरमणाय स्वाह नितम्बं पातु मे सदा ॥ ३६॥

ॐ गोपीरमणनाथाय पादौ पातु सदा मम ।
ॐ ह्रीं क्लीं रसिकेशाय स्वाहा सर्वं सदाऽवतु ॥ ३७॥

ॐ केशवाय स्वाहेति मम केशान्सदाऽवतु ।
नमः कृष्णाय स्वाहेति ब्रह्मरन्ध्रं सदाऽवतु ॥ ३८॥

ॐ माधवाय स्वाहेति मे लोमानि सदाऽवतु ।
ॐ ह्रीं श्रीं रसिकेशाय स्वाहा सर्वं सदाऽवतु ॥३९॥

परिपूर्णतमः कृष्णः प्राच्यां मां सर्वदाऽवतु ।
स्वयं गोलोकनाथो मामाग्नेयां दिशि रक्षतु ॥ ४०॥

पूर्णब्रह्मस्वरूपश्च दक्षिणे मां सदाऽवतु ।
नैर्ऋत्यां पातु मां कृष्णः पश्चिमे पातु मां हरिः ॥ ४१॥

गोविन्दः पातु मां शश्वद्वायव्यां दिशि नित्यशः ।
उत्तरे मां सदा पातु रसिकानां शिरोमणिः ॥ ४२॥

ऐशान्यां मां सदा पातु वृन्दावन-विहारकृत् ।
वृन्दावनी-प्राणनाथः पातु मामूर्ध्वदेशतः ॥ ४३॥

सदैव माधवः पातु बलिहारी महाबलः ।
जले स्थले चान्तरिक्षे नृसिंहः पातु मां सदा ॥ ४४॥

स्वप्ने जागरणे शश्वत्पातु मां माधवः सदा ।
सर्वान्तरात्मा निर्लिप्तः पातु मां सर्वतो विभुः ॥४५॥

इति ते कथितं वत्स सर्वमन्त्रौघ-विग्रहम् ।
त्रैलोक्यविजयं नाम कवचं परमाद्भुतम् ॥ ४६॥

मया श्रुतं कृष्ण-वक्त्रात् प्रवक्तव्यं न कस्यचित् ।
गुरुमभ्यर्च्य विधिवत् कवचं धारयेत् यः ॥ ४७॥

कण्ठे वा दक्षिणे बाहौ सोऽपि विष्णुर्न संशयः ।
स च भक्तो वसेद्यत्र लक्ष्मीर्वाणी वसेत्ततः ॥ ४८॥

यदि स्यात्सिद्धकवचो जीवन्मुक्तो भवेत्तु सः ।
निश्चितं कोटिवर्षाणां पूजायाः फलमाप्नुयात् ॥ ४९॥

राजसूय-सहस्राणि वाजपेय-शतानि च ।
अश्वमेधायुतान्येव नरमेधायुतानि च ॥ ५०॥

महादानानि यान्येव प्रादक्षिण्यं भुवस्तथा ।
त्रैलोक्यविजयस्यास्य कलां नार्हन्ति षोडशीम् ॥ ५१॥

व्रतोपवास-नियमं स्वाध्यायाध्ययनं तपः ।
स्नानं च सर्वतीर्थेषु नास्यार्हन्ति कलामपि ॥ ५२॥

सिद्धत्वममरत्वं च दासत्वं श्रीहरेरपि ।
यदि स्यात्सिद्धकवचः सर्वं प्राप्नोति निश्चितम् ॥ ५३॥

स भवेत्सिद्धकवचो दशलक्षं जपेत्तु यः ।
यो भवेत्सिद्धकवचः सर्वज्ञः स भवेद्ध्रुवम् ॥ ५४॥

इदं कवच-मज्ञात्वा भजेत्कृष्णं सुमन्दधीः ।
कोटिकल्पं प्रजप्तोऽपि न मन्त्रः सिद्धि-दायकः ॥ ५५॥

गृहीत्वा कवचं वत्स महीं निःक्षत्रियं कुरु ।
त्रिस्सप्तकृत्वो निश्शंकः सदानन्दो हि लीलया ॥ ५६॥

राज्यं देयं शिरो देयं प्रणा देयाश्च पुत्रक ।
एवंभूतं च कवचं न देयं प्राणसंकटे ॥ ५७॥

॥ इति श्री ब्रह्मवैवर्ते महापुराणे तृतीये गणपतिखण्डे/ नारद-नारायण संवादे परशुरामाय श्रीकृष्ण नाम कवचम् संपूर्णम् ॥

॥ श्री कृष्ण अष्टोत्तरशत नामावली ॥

1. ॐ कृष्णाय नमः।
2. ॐ कमलनाथाय नमः।
3. ॐ वासुदेवाय नमः।
4. ॐ सनातनाय नमः।
5. ॐ वसुदेवात्मजाय नमः।
6. ॐ पुण्याय नमः।
